जैमिनि विवाह मन्त्राः

१.२०. अनृक्षरा ऋजवः सन्तु पन्था एभिः सखायो यन्ति नो वरेयम् ।
समर्यमा सं भगो नोऽनुनीयात्सं जास्पत्यं सुयममस्तु देवाः ॥
अग्निरेतु प्रथमो देवताभ्यः सोऽसै प्रजां मुञ्चातु मृत्युपाशात् ।
तदयँ राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् स्वाहा ॥
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै जरदष्टिं कृणोतु ।
अशून्योपस्थ जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियं स्वाहा ॥
द्यौस्ते पृष्ठं रक्षतु वायुरूरु अश्विनौ च । स्तनन्धयस्ते पुत्रान् सविताभिरक्षतु ।
आ वाससः परिधानत् बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात् स्वाहा ॥
मा ते गृहेषु निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु ।
मा त्वँ रुदत्युर आ बधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजां
सुमनस्यमानां स्वाहा ॥
अप्रजस्यम् पौत्रमर्त्यं पाप्मानमुत वा अघम् ।
शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशँ स्वाहा ॥
परैतु मृत्युरमृतं म आगाद् वैवस्वतो नो अभयं कृणोतु ।
परं मृत्यो अनुपमेहि पन्थां यत्र नो अन्य इतरो देवयानात् ॥
चक्षुस्मते शृण्वते ते ब्रवीमि मानः प्रजां रीरिषो मोत वीरान् स्वाहा ॥
या आकृन्तन्नवयन् या अतन्वत याश्च देव्योऽन्तानभितो ततन्थ ।
तास्त्वा देव्यो जरसे संव्ययन्त्वायुष्मतीदं परिधत्व वासः ॥
परिधत्त धत्त वाससैनां शतायुषीं कृणुत दीर्घमायुः ।
शतं च जीव शरदः सुवर्चा वसूनिचार्ये विभृजासि जीवन् ॥
सोमोऽददत् गन्धर्वाय गन्धर्वोऽददत् अग्नये ।
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥
प्र मे पतियानः पन्थाः कल्पताँ शिवा अरिष्टा पतिलोकं गमेयम् ॥
प्रास्याः पतियानः पन्थाः कल्पताँ शिवा अरिष्टा पतिलोकं गम्याः ॥
या तिरश्ची निपद्यते अहं विधरणी इति ।
तां त्वा घृतस्य धारया संराधा राधायामसि संराधायै ॥
मा ते गृहेषु निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु ।

मा त्वँ रुदत्युर आ बधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजां
सुमनस्यमानां ॥ अन्वद्य नोऽनुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च
हव्यवाहनस्तत्करोतु समृध्यताम् ॥
द्यौस्ते पृष्ठं रक्षतु वायुरूरु अश्विनौ च । स्तनन्धयस्ते पुत्रान् सविताभिरक्षतु ।
आ वाससः परिधानत् बृहस्पतिर्विश्वे देवा अभिरक्षन्तु पश्चात् ॥
अप्रजस्यम् पौत्रमर्त्यं पाप्मानमुत वा अघम् ।
शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशँ स्वाहा ॥
यानि कानि च घोराणि सर्वाङ्गेषु तवाभवन् ।
पूर्णाहुतिभिराज्यस्य सर्वाणि तान्यशीशमम् ॥

१.२१. गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदिष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥
सोमोऽददद्गन्धर्वाय गन्धर्वोऽददग्नये । सोमः प्रथमो विविदे गन्धर्वो विविद
उत्तरः । तृतीयोऽग्निष्टे पतिस्तुरीयोऽहं मनुष्यजा ॥
अघोरचक्षुरपतिघ्नि एधि शिवा पशुभ्यः सुमनः सुवर्चः ।
वीरसर्जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥
आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वार्यमा ।
अदुर्मङ्गलीः पतिलोक माविश शं नो भव द्विपदे शं चतुष्पदे ॥
तां पूषच्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरु उशति विस्रयातै यस्यामुशन्तः प्रहरेम शेफम् ॥
अमोऽहमस्मि सा त्वं सामाहमस्म्यृक्त्वं मनोऽहमस्मि वाक्त्वं द्योरहं पृथिवी त्वं
तावेहि संभवाव सह रेतो दधावहै पुंसे पुत्राय वेत्तवै
मामनुव्रता भव सहशय्या मया भवासाव ॥
कन्यला पितृभ्यः पतिलोक मयतीयमप दीक्षामयष्ट ।
कन्या उत त्वया वयं धारा उदन्या इवातिगहेमहि द्विषः ॥
इयं नार्युपब्रूतेऽग्नौ लाजान्वपन्ती । दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥
अर्यम्णं नु देवं कन्याग्निमयक्षत । स इमां देवो अर्यमा प्रेतो मुञ्चातु मामुतः॥
विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषः ॥
एकमिषे विष्णुस्त्वान्वेतु । द्वे ऊर्जे विष्णुस्त्वान्वेतु । त्रीणि रायस्पोषाय
विष्णुस्त्वान्वेतु । चत्वारि मयोभवाय विष्णुस्त्वान्वेतु । पञ्च प्रजाभ्यो

विष्णुस्त्वान्वेतु । षड्तुभ्यो विष्णुस्त्वान्वेतु । सखा सप्तपदी भव ॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥
ध्रुवोऽसीति ध्रुवमुपतिष्ठते ध्रुवोऽसि ध्रुवाहं पतिकुले भूयासम् ॥
असावित्यात्मनोऽरुन्धतीमरुन्धत्यरुद्धाहं पत्या भूयासम् ॥

१.२२. पूषा त्वेतो नयतु हृतगृह्याश्विना त्वा प्रवहतं रथेन ।
गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥
स्वं कुलं प्राप्तां कल्याणशीलाः कल्याणप्रजाः समवजीर्णाः प्रत्यवरोपयन्ति
इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं संसृजस्वाथाजीव्री विदथमावदासि ॥
इह गावः प्रजायध्वमिहाश्वा इह पूरूषाः ।
इहो सहस्रदक्षिणोऽपि पूषा निषीदतु ॥
इह धृतिरिह स्वधृतिरिह रन्तिरिह रमस्व ।
मयि धृतिर्मयि स्वधृतिर्मयि रमो मयि रमस्व ॥
इमां त्वमिन्द्र मीढ्वः सुपुत्राँ सुभगां कृधि ।
दशास्यां पुत्राना धेहि पतिमेकदशां कुरु ॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥
मम व्रते ते हृदयं दधातु मम चित्तमनु चित्तं ते अस्तु ।
मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यम् ॥
अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः पापी लक्ष्मिस्तामस्या अपजहि ॥ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः पतिघ्नी तनूस्तामस्या अपजहि ॥ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः अपुत्र्या तनूस्तामस्या अपजहि ॥ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि । ब्राह्मणस्त्वा नाथकाम उपधावामि । यास्याः अपशव्या तनूस्तमस्या अपजहि ॥ अग्निवायुचन्द्रसूर्याः प्रायश्चित्तयो यूयं देवानां प्रायश्चित्तयाः स्थ । ब्राह्मणो वो नाथकाम उपधावामि । यास्याः पापिलक्षीर्या पतिघ्निया पुत्र्या या पशव्या तामस्या अपहत ॥
विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।

आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
गर्भं धेहि सिनीवालि सरस्वति । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥
हिरण्ययी अरणी यं निर्मन्थतामश्विनौ ।
तं ते गर्भं दधाम्यहं दशमे मासि सूतवे ॥